DAY — **04** SEAT NUMBER | | | | | | |

2025	II	14	1100	**J-273**	(SK)

SANSKRIT (33)

Time : 3 Hrs. **(16 Pages)** **Max. Marks : 80**

सूचना :

(१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(२) यथासूचनम् आकलनकृतयः, व्याकरणकृतयः आरेखितव्याः।

(३) आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।

(४) रिक्तस्थानपूरणे युज्यमानाः शब्दाः अधोरेखितव्याः।

प्रथमः विभागः — सुगमसंस्कृतम् । [६]

प्र. १. **(अ)** चित्रं दृष्ट्वा व्यावहारिक सूचनाः संस्कृतभाषया लिखत। (३)







(ब) व्यावहारिकशब्दमञ्जूषातः शब्दं चित्वां उचितं-स्तम्भे लिखत। (८ तः ६) (३)

वाद्यम्	कला	शिक्षणम्

(वेणुः, सूपकर्म, अधिष्ठाता, रङ्गशाला, ढक्का, नृत्यनाट्यम्, तक्षणम्, दूरस्थ-शिक्षणम्)

द्वितीयः विभागः — पद्यम्।

[१२]

(अवबोधनम्, पृथक्करणम्, शब्दज्ञानम्, अन्वयपूर्तिः, सरलार्थः)

प्र. २. **(अ)** पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। **(४)**

(१) अवबोधनम्। (३ तः २) (२)

(i) उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत।

नीलकण्ठं शङ्करं पार्वती - .....।

(अ) नृत्यं कर्तुम् आदिशति।

(ब) केकां कर्तुम् आदिशति।

(ii) उचितं शब्दं चित्वा चतुष्कोणं पूरयत।

रन्तुं गतेन कृष्णेन भक्षिता - [ ]

(iii) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत।

माता कृष्णस्य वदने मृद् अपश्यत्।

कृष्णेनाम्ब गतेन रन्तुमधुना मृद् भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याम्ब पश्याननम्।
व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जगद्
माता यस्य जगाम विस्मयवशं पायात्सः वः केशवः॥१॥
कस्त्वं? शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवायाः
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः॥२॥

(२) पृथक्करणम्। (२)

जालरेखाचित्रं पूरयत।



(ब) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। **(४)**

(१) अवबोधनम्। (३ तः २) (२)

(i) उचितं कारणं चित्वा वाक्यानि पुनर्लिखत।

कविः दारिद्र्य नमति, यतः .....।

(अ) दारिद्र्यं नाम काचिद् देवता।

(ब) दारिद्र्यात् सः सिध्दः जातः।

(ii) संस्कृतभाषया पूर्णवाक्येन उत्तरत।

केषां विवाहेषु गर्दभाः गीतं गायन्ति?

(iii) रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।

<u>तृणात्</u> तूलः लघुः।

उष्ट्राणां च विवाहेषु गीतं गायन्ति गर्दभाः।

परस्परं प्रशंसन्ति ''अहो रूपम्!'' ''अहो ध्वनिः!''॥१॥

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः।

वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति॥२॥

भो दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः।

पश्याम्यहं जगत्सर्वं न मां पश्यति कश्चन॥३॥

अद्यापि दुर्निवारं स्तुतिकन्या वहति कौमारम्।

सद्भ्यो न रोचते साऽसन्तोऽप्यस्यै न रोचन्ते॥४॥

(२) शब्दज्ञानम्। (३ तः २) (२)

(i) सन्धिविग्रहं कुरुत।

पश्याम्यहम् – ..... + ... ।

(ii) सर्वनामस्थाने नाम प्रयुज्य वाक्यं पुनर्लिखत।

असन्तः <u>अस्यै</u> न रोचन्ते। (स्तुतिकन्या)

(iii) गद्यांशतः विरुद्धार्थक शब्दं चिनुत।

(१) आनीतः × .....

(२) दाता × ..... ।

(क) पद्यांशं पठित्वा अन्वयपूर्तिं कुरुत अथवा माध्यमभाषया सरलार्थं लिखत। **(४)**

निर्वर्त्य पूजाविधिमायुधानां नीराजनां वाजिविभूषणं च।

व्रजन्ति सायं विजयादशम्यां सीमानमुल्लङ्घितुमत्र लोकाः॥१॥

वृषोत्सवः श्रावणमासि यत्र कोजागरी शारदपौर्णिमायाम्।

सम्पद्यमानस्त्रिपुरस्य दाहो विशिष्यते कार्तिकपौर्णिमास्याम्॥२॥

अन्वयः – अत्र लोकाः ..... आयुधानां नीराजनां ..... च निर्वर्त्य विजयादशम्यां सायं ..... उल्लङ्घितुं .....। यत्र ..... वृषोत्सवः ..... कोजागरी, ... सम्पद्यमानः त्रिपुरस्य ..... विशिष्यते।

तृतीयः विभागः — गद्यम्।

[९]

(अवबोधनम्, शब्दज्ञानम्, पृथक्करणम्, स्पष्टीकरणम्)

प्र. ३. **(अ)** गद्यांशं पठित्वा निर्दिष्टेः कृती कुरुत। **(४)**

(१) अवबोधनम्। (३ तः २) (२)

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

प्राचीन प्रसाधनानां विशेषः, यत् तत्र .....।

(अ) कृतकानां रसायनबहुलानां प्रसाधनानां प्राचुर्यम्।

(ब) नैसर्गिक प्रसाधनानां प्राचुर्यम्।

(ii) उचितं शब्दं चित्वा चतुष्कोणं पूरयत।

प्रसाधनस्य परमोत्कर्षः – [ ]

(iii) पूर्णवाक्येन उत्तरत।

हर्षचरिते के पटभेदाः निरूपिताः?

बाणकविना हर्षचरिते दुकूल–कौशेयचीनांशुक–क्षौमादयः पटभेदाः निरूपिताः। वस्त्राणां रञ्जनं, मुक्तामणिभिः तथा भक्तिभिः सुशोभनमपि वर्णितं तेन। नागपत्तनं, प्रतिष्ठानगरं, काशीपुरं तथा कलिङ्ग–वङ्ग–अङ्ग–चोलादिप्रदेशाः, चीन–सिंहलादिदेशाः प्रसिद्धाः नानाविधवस्त्राणां निर्माणे।

प्रसाधनस्य परमोत्कर्षः नाम भूषणविन्यासः। हेम–रजत–गजदन्त–शङ्खशुक्ति–मौक्तिक–रत्नादिभिः अलङ्काराणां निर्माणं भवति। भरतमुनिना वर्णितं चतुर्विधम् अलङ्करणं तथा तस्य कतिपयानि उदाहरणानि ईदृशानि सन्ति।

आवेध्यम् – कुण्डले, नासामौक्तिकम्।
बन्धनीयम् – केयूरम्, मेखला।
आरोप्यम् – बहुविधाः हाराः, चूडामणिः।
प्रक्षेप्यम् – नूपुरौ, कङ्कणानि।

'बहुभूषणं खेदकरम्, लघुभूषणं श्लाघ्यम्' एतदपि सूचितं भरतमुनिना।

सुगन्धीनि मृदुतराणि पुष्पभूषणान्यपि सर्वलोकप्रियाणि। यदि अशोक-कर्णिकार-सिन्दुवारादि-कुसुमालङ्कारा: धार्यन्ते तर्हि अनुक्रमेण माणिक्य-सुवर्ण-मौक्तिकादिभि: किं प्रयोजनम्?

दैनन्दिनजीवने प्रसाधनानि उपयुज्यन्ते एव, किन्तु विवाहादिषु तथैव उत्सवप्रसङ्गेषु जना: विशेषेण प्रसाधनपरा: भवन्ति। प्राचीनप्रसाधनविषये अयं विशेष: लक्षणीय: नाम नैसर्गिकतया उपलब्धानां प्रसाधनानां प्राचुर्यम्। मानसोल्लासग्रन्थे प्राकृतिकसामग्र्या विलेपन-चूर्णक-तैल-गन्धादिकानां निर्माणं वर्णितम्। कृतकानि तथा रसायनबहुलानि प्रसाधनानि तत्र न दृश्यन्ते। आधुनिककालेऽपि अस्माभि: एतत् सुष्ठु अवधारणीयम् अनुकरणीयं च।

(२) शब्दज्ञानम्। (३ त: २) (२)

(i) विशेषण-विशेष्ययो: मेलनं कुरुत।

'अ'	'आ'
सुगन्धीनि	जना:
प्रसाधनपरा:	अलङ्कारा:
	पुष्पभूषणानि

(ii) सन्धिविग्रहं कुरुत।

एतदपि ..... + ...

(iii) गद्यांशत: सप्तमीविभक्त्यन्तपदे लिखत।

(१) .....।

(२) .....।

अथवा

(२) पृथक्करणम्। (२)

मञ्जूषात: उचितं शब्दं चित्वा तालिकां पूरयत।

आवेध्यम्	बन्धनीयम्

(केयूरम्, नासामौक्तिकम्, कुण्डले, मेखला)

(ब) माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत। (२ तः १) **(५)**

(१) निवृत्तपरिहारान् पितेवानुगृह्णीयात्।

(२) निर्वचनस्य पञ्च विधाः सन्ति।

चतुर्थः विभागः — नाट्यकलशः। **[१३]**

(अवबोधनम्, शब्दज्ञानम्, पृथक्करणम्, स्पष्टीकरणम्)

प्र. ४. **(अ)** नाट्यांशं पठित्वा निर्दिष्टे कृतीः कुरुत। **(४)**

(१) अवबोधनम्। (३ तः २) (२)

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

कुशः महाराजं प्रणामं कर्तुं न इच्छति, यतः – .....

(अ) तापसाः अप्रणन्तारः इति तस्य अम्बा आह।

(ब) कुशः गर्वान्वितः आसीत्।

(ii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत।

अनेन युगलेन कुलीनेन भवितव्यम्।

(iii) पूर्णवाक्येन उत्तरं लिखत।

कुशलवौ कस्यां कलायां प्रवीणौ?

विदूषकः – वयस्य, कलादर्शनायागतौ द्वौ तापसकुमारौ कुशलवौ इति। तौ किल भगवतो वाल्मीकिमहर्षेः शिष्यौ प्रवीणौ वीणाकलाविज्ञाने।

रामः – वर्धते मे कुतूहलम्। तत्प्रवेशयाविलम्बितम्। (ततः प्रविशतः तापसौ कुशलवौ।)

कुशः – (अपवार्य) वत्स लव! इदानीं भगवतो वाल्मीकेरादेशात् अम्बामभिवाद्य प्रस्थिते मयि, त्वं पर्णशालायां किमुपदिष्टः अम्बया?

लवः – सा सन्दिष्टवती, ''वत्स! युवाभ्यां स्वाभाविकमवलेपं परित्यज्य, महाराजं प्रणम्य, कुशलं च परिप्रष्टव्यम्'' इति।

कुशः – युज्यते कुशलप्रश्नः, प्रणामस्तु कथम्?

लवः – कथम् न?

कुशः – अप्रणन्तारः किल अस्मद्विधाः तापसाः।

लवः – क एवमाह?

कुशः – अम्बा।

लवः – प्रणाममपि सा एव उपदिष्टवती। न च गुरुनियोगा विचारमर्हन्ति।

कुशः – साधयामस्तावत्। अग्रतस्तत्र यत्कालोचितमनुष्ठास्यावः।

(परिक्रामतः)

रामः – (विलोक्य) किन्नु खल्वेतत्।

न चैतदभिजानामि नाकूतमपि किञ्चन।

तथाप्यापातमात्रेण चक्षुरुद्बाष्पतां गतम्॥

रामः – (निर्वर्ण्य) सुव्यक्तमनेन युगलेन कुलीनेन भवितव्यम्।

(२) शब्दज्ञानम्। (३ तः २) (२)

(i) नात्यांशतः पूर्वकालवाचकं अव्यये चिनुत।

(१) ..... (२) .....

(ii) रेखाङ्कितं नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत।

<u>लवकुशौ</u> किल भगवतो वाल्मीकिमहर्षेः शिष्यौ। (एतद्)

(iii) सन्धि विग्रहं कुरुत।

प्रणामस्तु – ..... + ...

(ब) नाट्यांशं पठित्वा निर्दिष्टे कृती कुरुत। **(४)**

(१) अवबोधनम्। (३ त: २) (२)

(i) उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत।

योगसामर्थ्यात् परिव्राजक: .....।

(अ) शाण्डिल्यस्य प्राणान् अज्जुकायां शरीरे स्थापयति।

(ब) स्वप्राणान् अज्जुकाया: शरीरे स्थापयति।

(ii) पूर्ण वाक्येन उत्तरं लिखत।

कै: शोक: न करणीय:?

(iii) रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।

अज्जुका प्राणान् परित्यजति।

(परिव्राजक: प्रविशति।)

परिव्राजक: – शाण्डिल्य, शाण्डिल्य, (पृष्ठत: विलोक्य) न तावद् दृश्यते। न जाने निद्रावशं गत: अथवा मृत:। भवतु, एकमात्र: शिष्य:, दृढं परिपालयितव्य:।

(तत: प्रविशति शाण्डिल्य:।)

शाण्डिल्य: – भो:, क्षुधा मां बाधते। अस्माकं गेहे अशननाशेन अतीव बुभुक्षित: अहं भिक्षालोभेन अस्य दुष्टाचार्यस्य भाण्डभारगर्दभ: संवृत्त:। का गति:। भगवन्तम् एव अनुसरामि। एष खलु भगवान्। (उपगम्य) क्षम्यतां, क्षम्यतां भगवन्।

परिव्राजक: – न भेतव्यम्। आगच्छ, अध्ययनकाल: इदानीम्।

शाण्डिल्य: – अपसार्य अध्ययनं, भिक्षार्थमेव गच्छाव:।

परिव्राजक: – मूर्ख, प्रात:काल: अयम्, न भिक्षावेला। तस्माद् अध्ययनार्थम् इदमुद्यानं प्रविशाव:।

शाण्डिल्यः – प्रथमः कल्पः। (उद्यानं प्रविश्य) अहो रमणीयं खलु इदमुद्यानम्।

परिव्राजकः – इह एव आसिष्यावहे। आगच्छ वत्स, अधीष्व तावत्।

शाण्डिल्यः – न तावद् अधीष्ये। अध्ययनेन किं भवति?

परिव्राजकः – अध्ययनेन अष्टसिद्धयः लभ्यन्ते।

शाण्डिल्यः – अष्टसिद्धयः इति? भगवन्, तेन त्वं परदेहं परगेहं च प्रवेष्टु समर्थः भवसि?

परिव्राजकः – अथ किम्। छिद्यताम् एषा कथा। तूष्णीं स्थित्वा योगं चिन्तयावः।

शाण्डिल्यः – (आत्मगतम्) भगवान् तूष्णीं स्थित्वा योगं चिन्तयतु। अहं तु सुसमाहितः ओदनं चिन्तयामि। लड्डुकाः, मोदकाः .....

(ततः प्रविशतः गणिका सखी च।)

गणिकाः – हञ्जे मधुकरिके, कुत्र खलु सः मम चित्तचौरः रामिलकः?

शाण्डिल्यः – (दृष्ट्वा) अविधा, का नु खलु एषा? तरुणी, दर्शनीया, अस्य उद्यानस्य अलङ्कारः इव।

सखीः – अज्जुके, वसन्तसेने .....

शाण्डिल्यः – अयि, गणिका खलु इयं वसन्तसेना इति मन्ये। स्वरः अपि अस्याः अतिमधुरः। अहो रूपम्। अहो आनन्दः। अधुना यमः आगच्छतु यमदूतः वा आगच्छतु, अहं तु इत्थमेव नेत्राभ्याम् अस्याः सौन्दर्यरसपानं करिष्ये।

(२) पृथक्करणम्। (२)

क्रमेण योजयित्वा वाक्यानि पुनर्लिखत।

(अ) (१) सर्पदंशेन गणिकायाः मृत्युः।

(२) यमादेशेन यमदूतस्य उद्यानप्रवेशः।

(३) गणिकामृत्युकारणात् शाण्डिल्यस्य शोकः।

(४) यमदूतस्य सर्परूपधारणम्।।

(क) माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत। (२ तः १) **(५)**

(१) अयं तु दक्षिणो बाहुरायुधं सहजं मम।

(२) अथवा अनार्यः परदारव्यवहारः।

पञ्चमः विभागः - साहित्यपरिचयः साहित्यविशेषः च। [८]

प्रश्न ५. उचित विकल्पं चित्वा वाक्यं पुनर्लिखत। (१० तः ८)

(१) ब्राह्मीलिपी ..... अनेन विशदीकृता।

(जेम्स प्रिन्सेप, जेम्स वॅट, मॅक्समूलर)

(२) मालवादीनां गणराज्यानां परिचयः ..... एव जातः।

(हस्तलिखितैः, प्रतिमाभिः, नाणकैः)

(३) पुरातत्त्वशास्त्रे ..... इति एकः विभागः वर्तते।

(उत्खननम्, मुद्रणम्, प्रशस्तिः)

(४) साधनमाला-रूपावतार-प्रभृतयः ग्रन्थविशेषाः ..... विशदीकुर्वन्ति।

(चित्रनिर्माणं, लेखनिर्माणं, मूर्तिनिर्माणं)

(५) प्रासादमण्डनम् इति ..... विषयकः ग्रन्थः।

(स्थापत्यशास्त्र, पुरातत्त्वशास्त्र, प्रतिमाविद्या)

(६) महाव्रतविधौ अश्वमेधे च ..... क्रियन्ते स्म।

(कृतककलहः, कृतकसंवादः, कृतकनाट्यम्)

(७) ..... नटनर्तकाः वर्णिताः।

(रामायणमहाभारतयोः, शिक्षाग्रन्थेषु, भारतविद्यासु)

(८) अभिनयस्य ..... प्रकाराः भरतेन स्पष्टीकृताः।

(चत्वारः, त्रयः, नव)

(९) भरतमुनिः नाट्यस्य ..... प्रकारान् वर्णयति।

(दश, अष्ट, सप्त)

(१०) काव्येषु नाटकं रम्यं तत्र रम्या .....।

(शकुन्तला, रत्नावली, कुन्दमाला)

षष्ठः विभागः - लेखनकौशलम्। [१६]

प्रश्न ६. अधोनिर्दिष्टे कृती कुरुत। (३ तः २) (८)

(१) मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा चित्रपटवर्णनं पुनर्लिखत।

सिम्रन नाम्नी एका युवती विदेशे राजं नाम ..... यात्रायां मिलति। तौ आनन्देन कञ्चित कालं तत्र यापयतः। कालान्तरेण तयोः परस्परम् ..... जायते। किन्तु नायिकायाः बाल्ये एव तस्याः ..... पित्रा निश्चितः। ..... प्रत्यागत्य सिम्रन यथानिश्चयं विवाहं कर्तुं सिद्धा जायते। तदैव ..... राजः तत्र प्रविशति। प्रसन्नस्वभावेन सः ..... प्रियः जायते। सिम्रन् तेन सह ..... पलाय्य विवाहं कर्तुम् इच्छति। किन्तु पित्रोः अनुमत्या विना राजः विवाहार्थम् न सिद्धः। राज्यस्य प्रतिज्ञापूर्तिः एव चित्रपटस्य .....।

(चरमबिन्दुः, युवकं, गृहात्, अनुरागः, सर्वेषां, विवाहः, नायकः, स्वदेशे)

(२) निमन्त्रणपत्रिकाया: आधारेण संस्कृतभाषया वृत्तान्तलेखनं कुरुत। (८)

निमन्त्रणम्

॥संस्कृतेन हि संस्कृति:॥

सरोजिनी-विद्यालय:, मुरबाडग्राम:

आयोजयति

संस्कृतदिननिमित्तेन

संस्कृतवृन्दसङ्गीतम्

(छात्राणां संस्कृत - गीत - नृत्य - प्रस्तुतीकरणम्)

प्रमुखातिथि: - कु. विनी डिमेलो (लोकप्रिया बालगायिका)

अध्यक्ष: - प्रा. सिसिलिया लोबो (प्राचार्या)

स्थलम् - त्रिवेणी सभागृहम्, मुरबाडग्राम:

समय: - सायम् ५.०० त: ८.०० । दिनांक - १८ ऑगस्ट २०--

रसिकवराणाम् उपस्थिति: प्रार्थनीया।

* संयोजका: *

नदीम: इब्राहिम:	**नीला गुर्जर**	**सलोनी खारकर:**
संस्कृतशिक्षक:	सङ्गीतशिक्षिका	छात्रप्रमुखा
nadim784@gmail.com	९६××××××८५	८४××××××७५

(३) अधोदत्तेषु एकं विषयम् अधिकृत्य संस्कृतभाषया ८-१० वाक्येषु निबन्धलेखनं कुरुत। (८)

(१) परोपकार:।

(२) मित्रं प्रीतिरसायनम्।

(३) महाराष्ट्रदेश:।

सप्तमः विभागः — भाषाभ्यासः। [१२]

प्र. ७. अधोनिर्दिष्टा: कृती: कुरुत। (५ त: ४)

(अ) नामतालिकां पूरयत। (८ त: ६) (३)

क्र.	नाम	प्रातिपदिकम्	अन्तम्	लिङ्गम्	विभक्तिः	वचनम्
१	हिडिम्बाया:	-----	आकारान्तम्	स्त्रीलिङ्गम्	पञ्चमी/षष्ठी	---
२	विद्वत्सु	विद्वस्	----	पुल्लिङ्गम्	----	बहुवचनम्
३	राजर्षे:	----	इकारान्तम्	----	पञ्चमी/षष्ठी	एकवचनम्
४	जगति	जगत्	----	नपुंसकलिङ्गम्	सप्तमी	----

(आ) समासतालिकां पूरयत। (८ त: ६) (३)

क्र.	समस्तपदम्	समासविग्रहः	समासनाम
१.	चिन्तनमग्नाः	----------।	सप्तमीतत्पुरुषः।
२.	फलदा	फलं ददाति इति।	--------।
३.	कोषदण्डौ	----------।	इतरेतर द्वन्द्वः।
४.	तीर्णजलधिः	तीर्णः जलधिः येन सः।	---------।
५.	-------	पञ्चानां वटानां समाहारः।	द्विगुः।
६.	असन्तः	----------।	नञ् तत्पुरुषः।
७.	-------	पुरुः इति वंशः।	कर्मधारयः।
८.	प्रतिदिनम्	दिने दिने।	--------।

(इ) मञ्जूषातः तद्धितान्त-कृदन्तान् चित्वा उचितस्तम्भे लिखत। (८ त: ६) (३)

तद्धितान्ताः	कृदन्ताः

(साहित्यम्, प्राकृतिकम्, नाशः, निष्फलता, भ्राता, शक्तिः, चापलम्, मण्डनम्)

(ई) समानार्थकशब्दं लिखत। (८ तः ६) (३)

(१) वासः – .....।

(२) आयुधम् – .....।

(३) वह्निः – .....।

(४) कलहः – .....।

(५) भक्तम् – .....।

(६) शकुन्तः – .....।

(७) धर्मः – .....।

(८) परिव्राजकः – .....।

(उ) सूचनानुसारं परिवर्तनं कुरुत। (५ तः ३) (३)

(१) प्रसाधनकलायाः षोडश अङ्गानि सन्ति।

(लङ्लकारे परिवर्तयता।)

(२) रक्षाकरण्डकः सर्पः भवति, तं दशति च।

(पूर्वकालवाचकं धातूसाधित अव्ययं योजयत।)

(३) यमेन अहं प्रेषितः।

('यमेन' स्थाने 'यमः' प्रयुज्य वाक्यं पुनर्लिखत।)

(४) केशधूपे कृते केशाः सुगन्धेन विराजन्ते।

(सति-सप्तमी रचनां निष्कासयत।)

(५) रक्षकः द्वारताडनम् अकरोत्।

(कर्तुपदं बहुवचने परिवर्तयत।)

अष्टमः विभागः - अपठितम्।

[४]

प्रश्न ८. संस्कृतवाक्यानां माध्यमभाषया अनुवादं कुरुत। (६ तः ४)

(१) प्रयत्नेन एकलव्यः धनुर्विद्यायां पारङ्गतः जातः।

(२) त्वं ग्रामं कदा गमिष्यसि?

(३) आलस्यं मनुषस्य महान् रिपुः।

(४) वस्त्रस्यूतः पर्यावरणरक्षकः।

(५) आयुर्वेदस्य अष्टविभागाः सन्ति।

(६) त्वं एतत् कार्यं कुरु।

◆◆◆